This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रलोक प्रकाश टीका

कर्ता - दैवताराम

श्री:

१ मयूख

२रे ,, में १६ श्लोक

Accession No:- ~~10031~~ M1211

Title:- चन्द्रलोक प्रकाश टीका

Author:- देवताराम

पे:- (7)

K.K.S.U. LIBRARY RAMTEK 441 106 Dist. Nagpur
M-1211

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा०

१

श्रीमन्महागणपतयेनमः पृथ्वीपृथ्वीनपद्यांनववहतिनभस्तुंगतामुत्तमांगात्पाणिप्रक्षेपयोग्यंदधतिदशदिशः
किंचनैवावकाशम् ।कुर्यांकिंकानुकुर्यांत्रिपुरविजयिनस्ताण्डवेचिन्तयेत्थंमग्नःसर्गादिहेतुश्चिदशगुणनुतःश्रेयसेभैरवो
स्तु १ममसहजविरोधीनिर्जितोनेनभिस्वाधनुरितिवहलोद्यत्प्रीतिभाजास्मरेण स्रगिवकुवलयानामादरेणोपनीताजय
तिजनकजायाराघवेदृष्टिवृष्टिः २ अस्यस्थितोतुनगरीमहतोऽयोध्याभवत्यखिला इतिरघुवंशादधिकोजयतिवघेला
भिधोवंशः ३ देवपतेरिवशक्तिर्यस्यजयेभूभृतांप्रथिता श्रीवीरसिंहदेवस्तत्रधरामंडलेजातः ४ दशरथतोरघुपतिरिव
तस्मादिहवीरभानुभूपालः आवद्धधर्मसेतुर्जगतिसमुद्रेसमुद्भूतः ५ तत्तनयोनयनिर्मलकीर्तिस्वर्निम्नगाकमलम् श्रीरामचं रामः
द्रदेवोदूषणहन्तासमुल्लसति ६ श्रीवीरभद्रदेवोवैरिवधूमीनसन्तकीर्तिः जयतितदीयस्तनयःकविगोष्ठीदैवतारामः ७
क्रियतेतस्यदिनेशाच्चन्द्रालोकप्रकाशोयम् शरदागमइतिविदितोभट्टाचार्येणयत्नेन ८ विघ्नविध्वंसकामनयाकृतंमं १
गलंशिष्यशिक्षायैनिवध्नाति उच्चैरिति महारुद्रनेत्रपक्षेसूर्यरूपंचक्षुःमन्दतामरसतामुच्चैरस्यति·सूर्यस्यता

मरसाह्लादकत्वात्तस्मिन्सतितामरसेमंदत्वासंभवात् चंद्रात्मकंचक्षुर्जाग्रत्कलंयथास्यात्तथाकैरवध्वंसंहस्तयतेदू
रीकरोति·चन्द्रेसतिकुमुदाह्लादस्यजायमानत्वात् अग्निरूपंतुधृष्टउद्यन्योमदनःसएवानलंयत्नेदृग्गर्विः वाग्देवतापक्ष
क्षेमंदत्वमरसत्वंचउच्चैर्दूरीकरोति·वाग्देवतायाममन्दत्वरसत्वयोर्भावात् याचजाग्रत्कलंकैःप्रकटैर्दोषैर्येविध्वंसोव
चनाभावस्तमपाकरोति।तस्याःप्रसादेनदोषानपास्यवचनप्रयोगस्यकर्तुंशक्यत्वात्·सदोषागिरोभविष्यन्तीतिभीस्याहृदो

श्री॥ ॥उच्चैरस्यतिमन्दतामरसतांजाग्रत्कलंकैरवध्वंसंहस्तयतेवयासुमनसामुल्लासिनीमानसे॥
धृष्टोद्यन्मदनाग्नानार्चिरमलालोकत्रयीदर्शिकासानेत्रत्रितयीवखंडपरशोर्वाग्देवतादीव्यतु॥१॥

यज्ञानेतन्निराशोपायाज्ञानेचवचनप्रयोगोनचभवतिवाग्देवताप्रसादात्तदुभयज्ञानेतुभवतिनिरवग्रहोवचनप्रयो
गइत्यर्थः।धृष्टाउद्यन्मदायेज्ञानंविनैवप्रपंचगर्वपर्वतभाजस्तन्मात्रानांविस्तिषामस्याःप्रभावादपगमोभवतीत्यर्थः
वाग्देवताहरनेत्रयोरमलत्वंसमानमेवलोकत्रयप्रकाशकत्वंच·वाक्पक्षेसुमनसांमानसेउल्लासिनी·नेत्रपक्षेदेवाना

मानसेउल्लासिनी·सूर्योदयेमतियागाद्या
वरणात्वह्नौहोमाचरणात्चंद्रेलापित
स्याधानात् १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रा०
२

हूंहोइति॰विस्मयाज्ञानशालिनोयेतेषांचित्तस्वरूपाश्चन्द्रमणयः रसान्संवर्द्धयध्वं॰निर्विचारकविते स्वैरिणिनानाजनसाधा
रणत्वात् अस्मत्सकाशीभवमा॰अत्रोभयत्र हेतुः चंडेतिचन्द्रोदये चन्द्रमणेः स्रवणात्॰अभिसारिकाभिर्गतिसागात्॰ग्रंथस्यप्र
योजनमाह।उल्लासायेति॰विचाराएववीचिनिचयायत्रेतितादृशालंकारसमुद्रस्येत्यर्थः।एतावतालंकारलक्षणोभिधेयस्तेनप्र
तिपाद्यप्रतिपादकभावः संबंधः रसहृष्ट्यादिश्चप्रयोजनं दर्शितमितिभावः २ प्रयोजनकथनेन पंडितानस्मिन् प्रवर्त्तयति॰युक्त्ये

हूंहोविस्मयचित्तचन्द्रमणयः संवर्द्धयध्वं रसान्रेरे स्वैरिणिनिर्विचारकविते मास्मत्सकाशीभव उल्लासायविचारवीचिनिच
यालंकारवारांनिधेश्चंद्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती २ युक्त्यास्वाद्यलसद्रसैकवसतिः साहित्यसारस्वतः
क्षीरांभोधिरगाधतामुपदधत्सेव्यः समाश्रीयताम् श्रीरस्मादुपदेशकौशलमयं पीयूषमस्माज्जगज्जाग्रद्गुरुपक्ष
केसरयशाः शीतांशुरस्मादुधा॰ ३

ति।युक्तिश्चास्वाद्यलसद्रसश्चतयोरेकवसतिरित्यर्थः।अन्यत्रालंकारग्रंथे एतादृशीयुक्तिर्नास्तीत्यर्थः।साहित्यसंबंधिसारस्वतमेवक्षीराब्धिरित्यर्थः॰
ग्रंथान्तरापेक्षयात्रगांभीर्यमाह।अगाधतामिति।अतएवसेव्यः एतादृशस्यसमाश्रयणे फलमाह श्रीरिति॰श्रीर्धनं सरसनिषेवणेन कांतिश्च॰ए
तत्पाठेन स्वयमन्येषां गुरुरपिभवतीत्याह उपदेशेति।उपदेशस्यपीयूषत्वेनशिष्याणांप्रत्याप्तिसत्का॰अस्यग्रंथतोयशश्चंद्रोप्पेतत्सेवनेनस

ग्रीवैताभवतिजगति ३
रामः
२

उन्नतिरस्मद्धंगतिकाव्यलक्षणादिनिरीक्षितम्॰ १

औद्धत्यंपरिहरतीति॰तमिति अन्योपित्रसरेणुः सूर्यकिरणेजालान्तरगतेप्रकाशतेइत्यर्थः ४ आपाततः पूर्वाचार्यमतदूषकतया
प्रतीयमानापिमदुक्तिरसोविरोधंनावहतीसत आह।नाशंकनीयमिति॰दोषाभावनेनविचारकारकाणांतत्रसिद्धांतस्फूर्तेर्जायमानत्वा
दित्यर्थः ५ काव्यहेतुमाह॰प्रतिभेति॰कवित्वबीजभूतः संस्कारविशेषः प्रतिभासैवव्युत्पत्त्याभ्यासाभ्यासाद्यबीजंमृदादिसहितंलता

तंपूर्वाचार्यसूर्योक्तिज्योतिस्तोमोद्गमं स्तुमः यं संश्रित्य प्रकाशन्ते मद्गुणत्रसरेणवः ४ नाशंकनीयं पूर्वेषां मतमे
तेनदुष्यते किंतु चक्षुर्मृगाक्षीणां कज्जलेनेव भूष्यते ५ प्रतिभैव श्रुताभ्याससहिता कवितां प्रति हेतुर्मृदम्बु
संबद्धाबीजव्यक्तिर्लतामिव ६ निर्दोषा लक्षणवती सरीतिर्गुणभूषणा सालंकाररसानेकवृत्तिर्वाक्काव्य
नामभाक् ७ अंगीकरोति यः काव्यं शब्दार्थावनलंकृती असौ न मन्यते कस्मादनुष्णमनलंकृती ८

मिवकवितांसूतेइत्यर्थः ६ काव्यलक्षणमाह।निर्दोषेति॰अर्थोन्यत्रकाव्यतयोक्तोत्रकथमुपेक्षितइतिचेन्न॰निर्दोषत्वेनैवसा
र्थकत्वात् वृत्तिर्द्विधा॰मधुरादिरूपापंचधा॰व्यंजनादिरूपात्रिधेति बोधनवृत्तावनेकत्वं विशेषणम्॰दोषादीनामनेकत्वं स्वतए
वज्ञातव्यम् ७ शब्दार्थौ काव्यम् तत्र वक्राविदनलंकारत्वेपिन दोषइतिकस्यचिन्मतमपाकरोति॰अंगीकरोतीति॰यःकृती

शब्दार्थौकाव्यमांगीकरोतिकोनलतमनुष्णकस्मा
नाग्नीकरोतीत्यस्यार्थःकोगवुष्णताग्निकाक्षेर्धः
वसाग्नीकाव्यस्यार्थःअलंकारस्यैकाव्यांगस

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वं.शु.० निर्दोषत्वादिविशेषणीभूतं निरूपयितुं विशेष्यभूतां वाचं लक्षयति· विभक्तीति· शास्त्रीयशब्दत्वं लक्ष्यतावच्छेदकं· तेन भेरीशब्दा
३ दीनाति व्याप्तिः। एतावता नाम धातुस्वरूपा प्रकृतिः शब्दः। तस्यैव विभक्तियोग्यत्वादित्यर्थः। अस्यैव त्रैविध्यमाह। रूढेति· रूढो यौगिकस्तन्मि
श्रश्चेत्यर्थः ९ अथाद्यस्त्रिविध इत्याह। अव्यक्तेति· अग्रिमश्चाद्यः योगोऽवयवशक्तिः रूढिः समुदायशक्तिस्तत्राव्यक्तयोगो रूढः यत्र
विद्यमानोऽपि योगार्थो न प्रतीयते· यथा वृक्ष इति· अत्र --- तपमिति विद्यमानोपि योगो न प्रतीयते· वृक्षत्वस्यैव प्रतीतेः तस्य जातिरू

विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा ९ अव्यक्तयोगनिर्योगयोगा
भासैस्त्रिधादिमः ते वृक्षादिभ्वादिमंडपाद्या यथाक्रमम् १०

पत्वात्। निर्योगो यत्र योगो न संभवत्येव यथा भूवादिः अत्र पाणिनेः शंके तशब्दोऽयं धातुषु भूवादयो धातव इति स्मरणात्· न च भूवादिर्येषामि रामः
तिभुसत्याभूवादिशब्दो निष्पद्यते भ्वादय इति प्रसंगात्· नापि भूवाश्चादिर्येषामित्यन्वयानिष्पन्नोपि धातुप्रातिपदिकः धातुषु तद्वादित्वा ३
भावात्तस्माद्रूढ एवायं शब्दः परामर्शादभिप्रायाद्धातूत्प्रतिपादयतीति सिद्धम्· योगाभासः यत्र योगार्थः प्रकृतेऽर्थेनान्वेति विद्यमा
नोपि· यथा मंडपशब्दस्य गृहरूपेऽर्थे मंडं पिबतीति योगार्थः १०

यौगिकोपि त्रिविध इत्याह। शुद्धेति। तत्र प्रकृतिप्रत्ययोत्पन्नः शुद्धो योगः। यथा श्रांता दिशाब्दः यौगिकशब्दयोः समासः केव श्री
लप्रकृतिनिष्पाद्यस्तन्मूलो यौगिकमूलः यथा स्फुरत्कांतिरित्यादिः कुंतीत्यशुद्धो योगः कुंतीशब्दाद्यौगिकान्निष्पत्तेस्तन्निष्प ४
न्नः कौंतेयशब्दः संभिन्न इत्यर्थः ११ रूढयौगिकमाह। विशेषस्य सामान्यतायाः सामान्यस्य च विशेषतायायोगरूढे आश्र [illegible]

शुद्धतन्मूलसंभिन्नप्रभेदैर्यौगिकस्त्रिधा ते क्रान्तिस्फुरत्कांतिकौन्तेयादिस्वरूपिणः ११
तन्मिश्रोन्योन्यसामान्यविशेषपरिवर्तनात् नीरधिः पंकजं सौधं सागरो भूरुहः शशी॥ १२

यणं कारणवशेनान्योन्यसामान्यविशेषपरिवर्तनमेकरूपवायं भेदः तत्र नीराणि दधातीति सरःप्रभृतिसाधारणतया सामान्यस्य
समुद्रपरत्वे विशेषपरिवृत्तिः पंकजपदे कमलमादिसाधारणे कमलपरत्वे· सौधशब्दे सुधासंबद्धपदार्थान्तरसाधारणे गृहवि
शेषपरे· सागरशब्दे सगरसंबंधिपदार्थान्तरसाधारणे समुद्रपरे· भूरुहपदे भूजातपदार्थान्तरसाधारणे वृक्षपरे· शशिनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रा०
४

सामान्यपरिहृत्यायत्त्विद्यतितदाह क्षीरेति॰ अत्रनीराणिदधातीतिविशेषाश्रयणेक्षीरेतिव्याहतं स्यात्।सामान्यसमुद्रग्रहणेतुनानु
पपत्तिरित्यर्थः॥ननुपंकजपदस्यविशेषपरतायांकमलनिष्ठस्यचंद्रादिसाधारणसामान्यपरत्वेपिकथमाकाशपंकजमितिसिद्धिः॥त
त्राप्याकाशप्रभवत्वाभावादितिचेन्न।आकाशसंबंधमात्रेणाकाशपंकजमितिप्रयोगात्।यद्वा॰मन्दाकिन्यादिवर्णनीयकमलाभिप्रा
येणतथाप्रयोगः॥एवंसौधस्यगृहमात्रपरत्वेकलधौतसौधःसागरस्यसमुद्रमात्रपरत्वेक्षीरसागरः॰भूरुहशब्दस्यवृक्षमात्रप

क्षीरनीरधिराकाशपंकजंतेनसिध्यति विभक्त्यंतंपदंवाक्यंतद्व्यूहोर्थसमाप्तितः १३ युक्तार्थतां
तांचविनाखण्डवाक्यंसदृष्यते वाक्यञ्चखण्डवाक्यंचपदमेकमपिक्वचित् १४ १४

रत्वेसुरभूरुहः॥शशलांछनशब्दस्यचंद्रमात्रपरत्वेनिष्कलंकशशलांछनइतिसिध्यति॰शशलांछनत्वविशिष्टपरत्वेतुव्याघा राम:
तएवस्यादित्याशयः॥१३॥शब्दरूपांवाचंलक्षयित्वापरादिरूपांलक्षयति।विभक्त्यंतमिति॰पदंविभक्त्यंतं॰अर्थसमाप्तौ ४
पदव्यूहोवाक्यं॰सपदव्यूहएवखंडवाक्यंतामर्थसमाप्तिंविनासमासस्थलीयांयुक्तार्थतांचविना॰तथाचालुक्समासोपिन
खंडवाक्यमित्येषामाशयः॥समासांतरेपदसमूहत्वाभावात् १४

१× धूमवत्त्वादितिपथादेवेत्यामंत्रणंयथा।वाक्यान्येकांतविश्रांतान्याकुर्वाक्यकदंबकम् १५ ×

वाक्यत्वंखंडवाक्यत्वंचपदेक्वोपिक्वचिदस्तीत्याह॰वाक्यमिति॰क्रमादुदाहरति।धूमवत्त्वादिति।अत्रैकस्यैवविभक्त्यन्तस्यसत्वात्पदसमूहत्वा
हेत्वाकांक्षानिवर्त्तकविशिष्टार्थप्रतिपादकतयावाक्यत्वमित्यर्थः।देवेति।अर्थसमाप्तेरभावादित्यर्थः॥१५॥वाक्यानीति।एकार्थावच्छि
न्नोवाक्यसमूहोमहावाक्यमित्यर्थः।श्रीवीरभद्रभूपतिनिदेशतःप्राप्ततत्वेन॰प्रथममयूखेरचितश्चन्द्रालोकप्रकाशोयम्॥१६॥ ॥इतिश
रदागमेप्रथममयूखः १ ॥ श्रीवीरभद्रदेवेदिशतुजयंसंगरप्रकरे।मीनावतारशालीकालीयोत्सादनाचतुरः॥१॥त्याज्यतयादोषान्

महादेवःसत्रप्रमुखमखविधैकचतुरःसुमित्रातद्भक्तिप्रणिहितमतिर्यस्यपितरौ अनेनासावाद्यःसुकविजयदेवेनर
चितेचिरंचंद्रालोकेसुखयतुमयूखःसुमनसः १६ ॥ इतिप्रथममयूखः १ ॥अथदोषाः॥ स्याच्चेतोविशा
तायेनसक्षतारमणीयता शब्देर्थेचकृतोन्मेषंदोषमुद्घोषयन्तितम् १ भवेच्छ्रुतिकटुर्वर्णःश्रवणोद्वेजनेपटुः॥सं
विद्भुतेव्याकरणविरुद्धंच्युतसंस्कृति २

प्रथममाहास्यादिति।चेतसिविशातायेनरमणीयतानस्यतिसदोषःसचशब्दार्थगतत्वेनद्विविधइत्यर्थः १ श्रोत्रखेदक्षमःश्रुतिकटुरि
त्याह।भवेदिति॰यथात्रैवश्रुतिरितिपदमितिभावः।संविद्भुतइतिव्याकरणविरुद्धं च्युतसंस्कृति संविद्रतइत्यत्रसंपूर्वत्वेपिआत्मनेपद
मसाध्वित्यर्थः॥अकर्मकस्यैवतद्विधानादित्यर्थः २

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वं.प्र०
५

आम्नातमपिकविभिरनादृतमप्रयुक्तम्। यथा देवतशब्दः पुल्लिंग इत्याह। अप्रयुक्तमिति। दैवतानि पुंसि वेति सत्वात्। अभिप्रेतमर्थं वक्तुमसमर्थं यथा ग
च्छतीत्यत्र हन्तीत्याह। असमर्थमिति। ३ न देवच्छन्दोवद्वृतयोदाहरति। संहतीति। सकांतः कांतारे हन्ति गच्छतीत्यर्थः। हन हिंसागत्योरिति धातुपाठे
सत्यपि न समर्थमिति भावः। प्रसिद्धेनाप्रसिद्धार्थहतो निहतार्थः। यथा लोहितमिति वक्तव्ये शोणितमिति दर्शयति निहतार्थमिति। अत्र रुधिरेण
रागस्य निहतिः। इह च्युतसंस्कृत्यसमर्थयोर्वाचकत्वेपि क्रमेण व्याकरणकविसंप्रदायविरोधः। अर्थाश्रयस्तु निहतार्थे च्युतसंस्कृते तु शब्दाश्र

अप्रयुक्तं दैवतादिशब्दे पुल्लिंगतादिकम्। असमर्थन्तु हन्त्यादेः प्रयोगो गमनादिषु ३ स हन्ति हन्त कान्तारे कान्तः कुटिलकुं
तलः। निहतार्थं लोहितादौ शोणितादिप्रयोगतः ४ एकाक्षरं विना भू भ्रू क्ष्मादिकं खतलादिवत्। वनत्यनुचितार्थं यत्सद्माकुल्ल
देवतत् ५ इयमद्भुतनरवाग्रकेलिकौतुकवानरी निरर्थकन्तु हीत्यादि पूरणैकप्रयोजनम् ६ श्रीरामाय परमात्मने नमः।

यद्यस्याश्रयः। निहतार्थे तु वाचकत्वमेव नास्ति। इति निहतार्थासमर्थयोर्भेदः। ४ एकाक्षरे सवर्णांतरयोगः क्वचिदेव सुंदर इत्याह। एकाक्षरमिति। भू रामः
भूतलं भूतला क्ष्मातलमिति यावत्। खतलं कुलते त्यादि न शोभनमित्यर्थः। अनुचितार्थमाह। वनतीति। तत्तदेवानुचितार्थमेव। रूदाहरणम्। ५
॥५॥ इयमिति। अत्र वानरीरूपवशात्कामिन्याः कौरूप्यमनुचितं प्राप्यते। केवलपादपूरणप्रयोजनं तु हीत्यादि निरर्थकमित्याह।
निरर्थकमिति ६ रामः

यदुपसर्गेण यो धातुर्यत्रार्थे वाचकस्तस्मिंस्तं विनैव प्रयुक्तोऽवाचकमित्याह। अर्थ इति। उदाहरणमाधत्त इति। इदं करोतीत्यर्थेऽवाच
कम्। एवं धत्त इत्यर्थे विधत्त इत्यपि ॥७॥ व्रीडादिरूपतया त्रिविधमश्लीलमित्याह। अश्लीलमिति। आक्रांदेति। साधनं वायुना शशास्त्राः पुरु
षावयवविशेषशारीरविशेषप्रियामरणप्रतिपादकाः ॥८॥ अर्थवत्प्रतिपादकं सन्दिग्धं यथा नद्यांयांतीति नदीरूपे देशे वा यांतीत्यर्थद्वय
प्रतिपादकेन यामितिशब्दमित्याह स्यादिति। यत्पदं शास्त्रमात्रप्रसिद्धं तदप्रतीतं यथा वीतादिपदमनुमानविशेषप्रतिपादकमित्याह।

अर्थे विदधदित्यादौ दधदाद्यमवाचकम्॥ धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः॥७॥ अश्लीलं त्रिविधं व्रीडाजुगुप्सा
मंगलात्मना॥ आक्रांदसाधनं वायुः कान्तानां शोभवेस्तु धाम॥८॥ स्यादर्थमिह सन्दिग्धं नद्यां यांति पतत्रिणः॥ स्यादप्र
तीतं शास्त्रैकगम्यं वीतानुमादिवत्॥९॥ शिथिलं शयने लिल्ये मच्चित्तं ते शशिश्रिये॥ मस्तपिष्टकटीलोष्टगल्लादि
ग्राम्यमुच्यते॥१०॥ नेयार्थं लक्षणासंतप्रसरादमनोहरा॥ हिमांशोर्हारधिक्कारजागरेयामिकाः कराः॥११॥ रामः ॥

स्यादिति॥ उदाहरणे नैव शिथिलं प्रथयति। शिथिलमिति। एवंविधानां शिथिलत्वे श्रवणमेव प्रमाणमित्यर्थः। मंते शयने लिल्ये। किं भू
ते शशिश्रियीत्यर्थः। मस्तादयः शब्दा ग्राम्या इत्याह। मस्तेति ॥१०॥ भूयोभिः शब्दैर्लक्षणाश्रयणेन यत्रार्थः प्रतीयते तन्नेयार्थमित्याह। ने
यार्थमिति। अत्यंतप्रसरादमनोहरा लक्षणा नेयार्थः। अत्यन्तप्रसरश्च लक्षणाया वक्तृपदाश्रयणं धिक्कारे जागरे यामिका इत्यनेना

निमनोदरमप्रमातलमाता॥११॥ [uncertain]

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वं०लो०

यत्र भूयसार्थपरंपरयास्वल्पोर्थः प्रतीयते बुद्धिभिः पदैस्तत्क्लिष्टं यथा नदीतिवल्लभेहरीत्यादी साह क्लिष्टमिति· यत्र समासेन विधेयता च्छा
द्यते सोविमृष्टविधेयांशइत्याह। अविमृष्टेति। विश्रांतीति। अत्र विशिखवद्विश्रांतीति विधेयं तच्च अकृतसमासेन प्राप्यते विशिखकटाक्ष
योः साम्यमात्रं तु प्राप्यत इत्यर्थः। यत्र विरुद्धामतिस्तद्विरुद्धमतिकृदित्याह। अपराधीन इत्यत्र न पराधीन इति विवक्षितं नत्वपराधीनि च
प्रतीयते· अन्यान्वयविवक्षायामन्यान्वितमन्यसंगतमित्याह। अन्येति· उत्तुंगत्वं पयोधरे विवक्षितं हारे च प्रतीयत इत्यर्थः॥१४॥प्रकृ

क्लिष्टमर्थो यदीयोर्थश्रेणिनिश्रेणिमिच्छति॥ हरिप्रियापितृवधूप्रवाहपतिमंबवः॥१२॥ अविमृष्टविधेयांशः समासपिहिते
विधौ॥ विश्रांतिविशिखप्रायकटाक्षाः कामिनां हृदि॥१३॥ अपराधीन इत्यादि विरुद्धमतिकृन्मतम्॥ अन्यसंगतमुत्तुंगहारशोभिपयोध
रा॥१४॥ रसाद्यनुचितेवर्णे प्रतिकूलाक्षरं विदुः॥ नभामंगरजानासिरावर्णं रणदारुणम्॥१५॥ यस्मिन्नुपहतो लुप्तो विसर्ग इह तं तथा॥
कुसंधिः पटवागच्छ विसंधिर्न्नपतीइमौ॥१६॥

तानुचितवर्णप्रतिकूलाक्षरम्· यथा वीरे कोमलावर्णा इत्याह। रसेति। विसर्गो यत्रोत्वं प्राप्तः स उपहतविसर्गः यत्र च लुप्तः स लुप्तविसर्ग इत्याह। रामः
यस्मिन्निति। उदाहरणमत्रैव· उपहतो लुप्त इति प्रथमोदाहरणम्· विसर्ग इहेति चरमोदाहरणम्। कुसन्धीति। पटोऽग्राग च्छेत्यत्र पटवागच्छे
ति संधेर्नमनोहरत्वमित्यर्थः। विसन्धीति। स्वेच्छया विसन्धिः सकृदपि दोषः सोऽत्रस्त्वसकृदिति भावः॥१६॥

KKSU LIBRARY
RAMTEK
441 106
M-1211
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 16:29
,TRANSFERRED=2020/10/23 at 16:30:21
,PAGES=7
,TYPE=STD
,NAME=S0004508
,Book Name=M-1211-CHANDRALOK PRAKASH TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection